International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 146-148
© 2026 IJMH
www.themultijournal.com
Received: 21-03-2026
Accepted: 03-04-2026
Publish : 04-04-2026

**डॉ.पारमिता पण्डा**
उपाचार्या, पुराणेतिहासविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**डॉ.पारमिता पण्डा**
उपाचार्या, पुराणेतिहासविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# भारतीयज्ञानपरम्परायां पुराणोक्तजनजातिसंस्कृतिः

**डॉ.पारमिता पण्डा**

**"नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।**
**देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्।।"**

**उपक्रमः-**

अस्माकं सत्यसनातनभारतीयसंस्कृतौ चतुर्दशविद्यानां महत्वपूर्णं स्थानं वर्तते। एताषु चतुर्दशविद्याषु अष्टादशमहापुराणानां स्थानं अतुलनीयम्। पुराणसाहित्यं हि भारतस्य भारतीयज्ञानपरम्परायाश्च अमूल्यो निधिः वर्तते। पुराणेषु स्पृहणीयचरितानां राजर्षि-महर्षि-देवर्षीणां पवित्रजीवनचरितस्य विवरणं अस्माभिः साक्षात् द्रष्टुं श्क्यते। हिन्दुसंस्कृतेः वास्तविकचित्रं पुराणेषु एव सुरक्षिता विद्यते। पौराणिककथानुसारेण आध्यात्मदर्शन – धर्म– नीति – कलाकौशल- भूगोल – खगोल – वास्तुज्ञान-विज्ञानानामद्भुतं रहस्यं विद्यमानं वर्तते।यथा सृष्टि – प्रलय - स्वर्ग – नर्क – आश्रमचतुष्टय – साधन-चतुष्टय - भगवद्भक्ति – मोक्ष - आचारविचारोपदेश - वंश – वंशानुचरति - मन्वन्तर – भुवनकोश – ईश्वरतत्त्व - जीववैचित्र्यादयो बहुविधविषयाः आलोकिताः सन्ति। अतः स्कन्दपुराणे उक्तम्-

**पुराणमखिलं तात ! सर्वशास्त्रमयं स्मृतम्।**[1]

वेदेषु येषाम् आध्यात्मिकाधिदैविकाधिभौतिकबौद्धिकव्यवहारिक - नैतिकसांस्कृतिकदेवमानुष- जड-चेतनात्मिकानां विषयाणां सूक्ष्मरूपेण वर्णनं दृश्यते। ब्राह्मणभागे, आरण्यके, स्मृतिग्रन्थेषु च येषां प्रतिपादनमस्ति, ताषां सर्वप्रकाराणां विद्यानां वर्णना पुराणेषु आकर्षकबुद्धिगम्येन मनोग्राह्योपदेशेन कथानकरूपेण च विद्यते। पुराणेषु जातिधर्मवर्णनिर्विशेषे समस्तज्ञानक्षेत्राणां समावेशोपलभ्यते।

पुराणेषु सर्ववृहत् पुराणं भवति स्कन्दपुराणम्। पुराणेऽस्मिन् विद्यमानेषु खण्डेषु वैष्णवखण्डे बहवः विषयाः वर्णिताः सन्ति। तेषु विषयेषु उत्कलखण्डे पुरुषोत्तमक्षेत्रस्य विषये, पुरुषोत्तमः भगवान् श्रीजगन्नाथस्य माहात्म्यविषये, जनजाति-आदिवासीसंस्कृतिविषये, वसुधैव कुटुम्बकमिति विषयेऽपि सम्यक् वर्णितमस्ति।

**जगतः नाथः श्रीजगन्नाथः -**

पुरुषोत्तमः भगवतः श्रीजगन्नाथस्य स्थानं भवति श्रीपुरुषोत्तमक्षेत्रम्। यथा विश्वविश्रुतं विद्यते तथैव अस्मिन् धाम्नि प्रचलिता जगन्नाथसंस्कृतिरपि विश्वविश्रुता प्रसिद्धा च अस्ति। अत्र प्रचलितं धर्मदर्शनमपि बहुव्यापकं प्रशस्तं च विद्यते। अखण्डकोटिकैवल्यनाथः श्रीजगन्नाथः यथा रहस्यमयः तथैव तत्त्वमपि अतीव रहस्यमयम् । कदापि अत्र कस्यापि सम्प्रदायस्य भेदः न दृश्यते । यद्यपि रत्नसिंहासने एताः चतस्रमूर्त्तयः यथा – श्रीजगन्नाथः, भ्राता बलभद्रः, भगिनी सुभद्रा सुदर्शनेन च सह दृश्यन्ते तथापि एतासां मूर्तिनां समन्वयः श्रीजगन्नाथेन साकमेव परिकल्पितः। अतः सर्वे धर्मावलम्बिनः स्वस्वाराधितदेवानां स्वरूपं श्रीजगन्नाथस्वरूपे द्रष्टुं प्रभवन्ति । शङ्कराचार्यतः प्रारभ्य जिनः, बुद्धः, रामानुजः, नानकः तथा चैतन्यं यावत् बहवः दार्शनिकाः साधकाश्च पुरुषोत्तमक्षेत्रमागत्य श्रीजगन्नाथस्य आनन्त्यभावं स्वीकृतवन्तः। अतः लीलापुरुषस्य नीलाद्रिनाथस्य धाम्नः सर्वधर्मसमन्वयवादस्य समुद्घोषणं सर्वदा अभवत्, भवति, भविष्यति च नास्त्यत्र सन्देहस्य लेशोऽप्यवकाशः। अतः उक्तं स्कन्दपुराणे –

**अहो तवायं खलु भाग्यराशिः**

**येन विशसीद्भूवि दारूमूर्त्तिः।**

**यस्यात्युपास्तिं श्रुतिराहं मुक्तिः**

**प्रदामनात्मज्ञविमोहितानाम्।।**

**य एष प्लवते दारू सिन्धोः पारे द्वपौरूषम्।**

**तमुपास्य दूराराध्यं मुक्तिं यान्ति सुदुर्लभाम्।।**[2]

विरञ्चिप्रपञ्चितेऽस्मिन् जगति जन्मितानां जीवानाम् आनन्द-मधिगन्तुमेव अनादिकालिकी प्रवृत्तिः। तदेवानन्दम् अखण्डरूपेण दातुं कोटिकैवल्यनाथः श्रीजगन्नाथः एव समर्थः। भगवतो श्रीजगन्नाथस्य महिमा अवर्णनीयम्। श्रीजगन्नाथसंस्कृतौ जातेः धर्मस्य वा न कस्यापि महत्त्वं वर्तते, सर्वेऽपि अत्र समानाः। अयं जगन्नाथः पुरुषोत्तमधाम्नि अवस्थापितो समग्रविश्वम् अवलोकयति। अत्र जाति-धर्म-वर्ण-सम्प्रदायादि भेदभावो नास्ति। ब्राह्मणक्षत्रीयवैश्यशूद्राणां समभावः श्रीजगन्नाथसंस्कृतौ परिलक्ष्यते। यतोहि श्रीजगन्नाथतत्त्वे सकल-तत्त्वानां समन्वयो दृश्यते। तस्यैव परमतत्त्वस्य श्रीजगन्नाथस्य आदिवासिसंस्कृतौ कः प्रभावः तदेव सन्दर्भेस्मिन् आलोच्यते।

**पुराणोक्त जनजातिसंस्कृतिः-**

वस्तुतः आदिवासीशब्देन आदिमाधिवासीति अवगम्यते। श्रीजगन्नाथः एकाधारेण वैदिकदेवः, पुराणपुरुषः, शून्यपुरुषः इति बहुधा बहुत्र च प्रमाणितं मनीषिभिः। तर्हि अत्र मनसि विजृम्भते यत् – कथम् एकस्मिन् तत्त्वे एतत् सर्वं सिध्यति ?

प्राक्वैदिककाले जनाः प्रकृतिं शक्तिः इति मत्वा पूजयन्ति स्म। प्रकृतिः इत्युक्ते - वनस्पतयः, औषधयः, वृक्षाश्चेत्यादयः। यथा भगवद्गीताया-मुच्यते -

**भूमिरापोनलोवायु खं मनोबुद्धिरेव च।**

**अहङ्कारं इत्ययं मे भिन्ना प्रकृतिरष्टधा।।**[3]

तत्र यथार्थेन तदानीन्तनजनाः यमाश्रीत्य जीवनं यापयन्ति स्म तदनुसारेण प्राथम्यमासीत्। तेनैव क्रमेण वृक्षस्य सर्वोत्कृष्टत्वं जनैः अनुभूतः। तत्र शवराः अपि तथैव प्राचीनकालाद्देव वृक्षं पूजयन्ति स्म। ते वृक्षं **जगत्** इति नाम्ना सम्बोधयन्ति स्म। तस्मात् **जगत्** शब्दात् **जगन्नाथ**शब्दस्योत्पत्तिः इति केचन विद्वांसः आमनन्ति। करुणासागरदासेन स्वक्षेत्रवल्यां उट्टङ्कितं यत् –

**तटेम्बोनीलाचल इति गिरेर्गह्वरगतो।**

**भजननीलाभ्राभां परमरूचिरां माधवतनुम्।।**

**पुराश्रीमद्विश्वावसुशबर सम्पूजितो पदो।**

**जगन्नाथो नाथो मम हृदयनाथो विजयताम्।।**

(स्कन्दमहापुराणम्)

अर्थात् श्रीजगन्नाथः आदौ नीलमाधवरूपेण विश्वावसुशवरेण पूजितो आसीत्। ततः इन्द्रद्युम्नेन स्वमन्त्रिणं विद्यापतिं सम्प्रेष्य श्रीजगन्नाथमन्वेष्य विश्वकर्माणं च आहूय श्रीमन्दिरे प्रतिष्ठापितम्। अर्थात् स एव नीलमाधवः दारूब्रह्मश्रीजगन्नाथरूपेण परिवर्णितम्। स्कन्दपुराणे श्रीजगन्नाथस्य प्रतिमानिर्माणविधिः तथा मूर्त्तिप्रतिष्ठादि विषयाः परोक्षतया निरूपिताः सन्ति। अस्यैव दारुब्रह्मणः महत्वं नैकधा वर्णितं विहृते। भक्तजनाः श्रीजगन्नाथं मानवरूपेण पश्यन्ति। यतोहि श्रीजगन्नाथः मानवलीलायाः आचरणं कृत्वा मानवरिव स्वपरिचर्च्चां निर्वहन्ति।

आसंवत्सरे बहवोत्सवाः परिपालयन्ते। प्रातःकालीन मङ्गलारतीतः रात्रौ शयनं यावत् मानवीयकार्याणि श्रीमन्दिरे अनुष्ठीयते। तेषु बहुषु उत्सेवेषु मुख्यतया द्वादशोत्सवाः भवन्ति। सन्दर्भेऽस्मिन् स्कन्दपुराणे उच्यते -

**मञ्चस्नानं रथवरवगति शायनं चापनद्धे।**

**पार्श्वावृत्तिः शयपरिवृत्तिः प्रावृत्तिः पुष्यपूजा।।**

**दोलाकेलि दमनकमहोऽक्षयपुण्यतृतीया।**

**यात्रास्कान्दे विधिनिगह्वा द्वादशैता नरेन्द्रः।।**

(स्कन्दमहापुराणम्)

वस्तुतः भक्तानां कृते सः एव नरः पुनः सोऽपि नारायणः। यतोऽहि समाजवादस्य मूलमन्त्रः भवति ऐक्यं तदेव ऐक्यभावः श्रीजगनाथ-मन्दिरे दरीदृश्यते। एतदेव ऐक्यभावः आदिवासिसंस्कृतेः मूलमन्त्रं भवति। श्रीजगन्नाथस्य दैनन्दिनरीतिनीतौ आदिवासिसंस्कृतेः प्रतिफलनं नितरामनुभूयते। श्रीजगन्नाथः निराकारसाकाररूपयोः प्रतीकभूतः। यद्यपि साकारतया श्रीजगन्नाथस्य स्वरूपं दृश्यते, तथापि भक्ताः तस्य निराकारस्वरूपमनुभवन्ति। तदेव निराकारत्वम् आदिवासिसंस्कृतेः आदिमं तत्त्वम्। श्रीमन्दिरे सम्प्रति पाञ्चरात्रा-गमानुसारं पूजादिकं प्रचलति। तत्र प्रातःकाले भगवतः श्रीजगन्नाथस्य नैवेद्यं **महाप्रसादः** इति कथ्यते। तस्य महाप्रसादस्य माहात्म्यमपि अत्यन्तं वैचित्र्यकरम्।

यतोऽहि षट् संस्कारेण संस्कृतस्य प्रसादस्य अन्नेत्वं विलोप्य तत्र बहूत्वस्यारोपः भवति। तस्मादेव कारणात् आचाण्डालात् ब्राह्मणं यावत् सर्वे एकत्र एकस्मिन्नैव पात्रे एकीभूय महाप्रसादं भोक्तुं प्रभवन्ति। तदेव महाप्रसादः पाकान्तौ एव सिद्धति। यत्र काष्ठाणामेव व्यवहारः न तु अन्येषाम्। नैवेद्यनिर्माणेऽपि मृत्तिकापात्राणामेव व्यवहारः। समर्पणसमयेऽपि तेनैव पात्रेण समर्प्यते। भोजनमपि तेनैव मृत्तिकापात्रेण एव क्रीयते। आदौ तावत् सूर्यपूजां विधायैव अन्यानि कार्याणि भवन्ति। श्रीमन्दिरे आदिवासिसंस्कृतौ सूर्यपूजायाः प्राधान्यम् अपि दृश्यते ।

सूर्यपूजा महाप्रासादस्य च अनुष्ठानसमये अक्षतचूर्णस्यापि व्यवहारः विधीयते। यत् **मुरुज** इति शब्देन व्यवह्रियते । तदेव आदिवासीनाम् उपचारो वर्तते। श्रीजगन्नाथमानवलीला संघटनावसरे स्नानपूर्णिमायां स्नानं कृत्वा सामान्यमनुष्यरिव ज्वराक्रान्तो भवति।

ज्वरशान्तये पञ्चदशदिनं यावत् अनसरगृहे तिष्ठति। तत्र विभिन्नैः उपचारैः उपचारः क्रियते। तदेवुपचारः **गुप्तपूजा** इति नाम्ना अभिधीयते। यतोहि तस्मिन् समये आदिवासि उपचारः एव प्रचलति स्म। यथा विभिन्नैः पुष्पैः प्रपानकेन च प्रदीपकं प्रज्वाल्य उपचारः क्रीयते। ये वरिष्ठाः सेवकाः ते तु यावत् उपोष्य केवलं फलादिकं स्वीकुर्वन्ति। ज्वरशान्त्यन्तरं नगरपरिक्रमणं करोति । इदञ्च परिक्रमणं रथयात्रा इति नाम्ना प्रसिद्धा।

रथयात्रायामपि वनवासिसंस्कृतिः प्रतिपदम् अनुभूयते। यतोऽहि दारूणा निर्मितो अयं जगन्नाथः दारूनिर्मितेन रथेन एव स्वयात्रां पालयति। अतः उच्यते **स्वयं स्वासनविग्रहः** इति रथयात्रायां यद्यपि सन्ति वहूनि कार्याणि यथा– पदहुण्डनं, पुष्पमुकुटं (पहिड,टाहिओ) सेनापटाधारणं, पुरोडाशसमर्पणम्। एतत्सर्वम् आदिवासिसंस्कृतेः अवगाहनं करोति।

श्रीजगन्नाथः रथयात्रायां **गुण्डिचा** मन्दिरं प्रति गच्छतीति आलोचकाः स्वीकुर्वन्ति । ऐतिहासिकानामपि अस्मिन् विषये मतैक्यं परिदृश्यते। श्रीजगन्नाथः मनुष्यवत् स्वशरीरमपि प्रतिद्वादशवर्षे परिवर्तयति। तदा दाहसंस्कारोऽपि विधीयते। परन्तु अस्मिन् दाहस्स्कारे चतुर्द्धामूर्त्तिनाम् अग्निदाहः न भवति, अपि तु आदिवासिरीत्या श्रीजगन्नाथादि चतुर्धामूर्त्तिनां भूमिगर्भः क्रियते।
पुनः नवकलेवरसमयेऽपि वनयागः अनुष्ठीयते। आमासं यावत् वनयागपद्धत्या प्रचलत्ययं यागः। यत्र आदिवासिसंस्कृतेः उट्टङ्कनं भवति। तत्र प्राध्यान्येन अयं जगन्नाथः पर्वते एव निवसति **नीलाद्रौ शङ्खमध्ये……..** इति । एतस्मात् ज्ञायते श्रीजगन्नाथस्योऽपरि आदिवासि संस्कृतेः प्रभावः नितरां वर्तते ।

**उपसंहारः-**

यथा भारतीयसंस्कृतौ श्रीजगन्नाथसंस्कृतौ च जनजातियानां आदिवासीजनानां वा प्राधान्यं, समाजे महत्त्वपूर्णस्थानं च विद्यते तथैव नान्यत्र दृश्यते। आदिवासीजनाः एव प्रकृतेः प्रकृष्टो रक्षाकर्त्तारः भवन्ति। तेषां महद्योगदानेनैव अद्यापि नदी-अरण्य-प्राणी-पशु-विहगादयः सुरक्षिताः। समाजं प्रति एतेषां योगदानं अस्माभिः न कदापि विस्मृतव्यम्। एतेषामेतन्मूलमन्त्रं अस्माभिः सर्वेरपि सर्वदा पालनीयाः। यथा -

**सर्वेऽपि सुखिनः सन्तु सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्।।**

**सन्दर्भग्रन्थसूची –**


१. **श्रीमद्भगवद्गीता –** साधकसञ्जीवनीटिका, स्वामिरामसुखदासः, गीताप्रेस्, गोरखपुर, २०१८ ई.।

२. **स्कन्दमहापुराणम् –** एस्. एन्. खण्डेलवाल्, चौखम्बा संस्कृत सीरिज अफिस्, वाराणसी, २०१६ ई.।

३. **ब्रह्मवैवर्त्तपुराणम् -** गीताप्रेस्, गोरखपुर, २०१९ ई.।


**पाद टिप्पणी: -**

[1]स्क.पु.-०७/१४

[2]स्क.पु.पु.क्षे.मा.-२१/२,३

[3]भ.गी.- ७/४